कृष्णयजुर्व्वेदान्तर्गतोपनिषद्विशेषः। यथा, मुक्तिकोपनिषदि। "कठवल्लीतैत्तिरीयकब्रह्मकैवल्यश्वेताश्वतरेत्युपक्रम्य कृष्णयजुर्व्वेदगतानां द्वात्रिंशत्संख्यकानामुपनिषदां सहनाववत्विति शान्तिः" ॥)

कैशिकं, क्ली, (केशानां समूहः। "केशाश्वाभ्यां यञ्छावन्यतरस्याम्"। ४। २। ४८। इति पक्षे ठक्।) केशसमूहः। इत्यमरः। २। ६। ९६ ॥

कशिकः, पुं, (केशेषु केशविन्यासादौ साधुः। केश+ठक्।) शृङ्गाररसः। इति शब्दरत्नावली जटाधरश्च ॥

कैशिकी, स्त्री, (कैशिक+स्त्रियां ङीप्।) नाटकवृत्तिविशेषः। यथा। "भारती सात्वती कशिक्यारभट्यौ च वृत्तयः"। इति हेमचन्द्रः ॥

कैशोरं, क्ली, (किशोरस्य भावः। किशोर+अण्।) किशोरावस्था। इति शब्दरत्नावली ॥ सा तु दशमवर्षोत्तरपञ्चदशवर्षावधिः। इति स्मृतिः ॥

कैश्यं, क्ली, (केशानां समूहः। इति ष्यञ्।) केशसमूहः। इत्यमरः। २। ६। ९६ ॥

कोकः, पुं, (कोकते आदत्ते चन्द्रसुधामिति। कुक् आदाने+पचाद्यच्।) चक्रवाकः। (यथा, गीतगोविन्दे ५। १७।
"कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना"॥)
वृकः। (यथा, रामायणे। ५। २६। ९।
"वने यूथपरिभ्रष्टा मृगी कोकैरिवार्द्दिता" ॥)
व्येष्ठी। खर्ज्जूरीवृक्षः। भेकः। इति मेदिनी ॥ विष्णुः। इति त्रिकाण्डशेषः ॥

कोकड़ः, पुं, (कोकं कोकरवं वृकध्वनिवत् ध्वनिमित्यर्थः लाति गृह्णातीति। ला+कः। लस्य ड़त्वम्।) विलेशयमृगविशेषः। तत्पर्य्यायः। जविनः २ कोकवाचः ३ विलेशयः ४ चमरपुच्छः ५ लोमशः ६ धूम्रवर्णकः ७। तन्मांसगुणाः। श्वासानिलकासहरत्वम्। पित्तदाहकरत्वञ्च। इति राजनिर्घण्टः ॥

कोकदेवः, पुं, (कोकश्चक्रवाकः स इव दीव्यति क्रीड़तीति। दिव्+अच्।) कपोतः। इति राजनिर्घण्टः ॥

कोकनदं, क्ली, (कोकान् चक्रवाकान् नदति नादयति वा स्वविकाशेन। कोक+नद+अन्तर्णिच् ततोऽच् मूलविभुजादित्वात् को वा।) रक्तकुमुदम्। रक्तपद्मम्। इति मेदिनी। (यथा, गीतगोविन्दे। १०। ५।
"नीलनलीनाभमपि तन्वि! तव लोचनं धारयति कोकनदरूपम्"। अस्य पर्य्याया यथा,—
"रक्तं कोकनदं पद्ममल्पमन्यद्लोहितम्"।
इति वैद्यकरत्नमालायाम् ॥)

कोकनदच्छविः, पुं, (कोकनदस्य रक्तोत्पलस्य छविरिव छविर्द्दीप्तिर्यस्य।) रक्तवर्णः। तद्वति त्रि। इत्यमरः।

कोकबन्धुः, पुं, (कोकयोः चक्रवाकयुगलयोर्दिवसप्रभया संयोगकारितया बन्धुरिव।) सूर्य्यः। इति शब्दचन्द्रिका।

कोकायः, पुं, (कोकः खर्ज्जूरीवृक्षस्तद्वदयमागोऽस्य।) समच्छिलवृक्षः। इति राजनिर्घण्टः ॥

कोकाहः, पुं, (कोक इव आहन्ति वेगेन गच्छतीति। आ+हन्+डः।) श्वेतघोटकः। तत्पर्य्यायः। कर्कः २। इति हेमचन्द्रः ॥ क्वचित् पुस्तके काकाह इति पाठः ॥

कोकिलः, पुं, (कुक् आदाने+"सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच्"। उणां १। ५५। इति इलच्।) स्वनामख्यातकृष्णवर्णमधुरस्वरपक्षी। (यथा, रामायणे। २। ५२। २।
"भास्करोदयकालोऽयं गता भगवती निशा।
असौ सुकृष्णविहगः कोकिलस्तात! कूजति" ॥)
तत्पर्य्यायः। वनप्रियः २ परभृतः ३ पिकः ४। इत्यमरः। २। ५। १९ ॥ परपुष्टः ५ कालः ६ वसन्तदूतः ७ ताम्राक्षः ८ गन्धर्व्वः ९ मधुगायनः १० वासन्तः ११ कलकण्ठः १२ कामान्धः १३ काकलीरवः १४ कुहूरवः १५ अन्यपुष्टः १६ मत्तः १७ मदनपाठकः १८। इति राजनिर्घण्टः ॥ (अस्य गुणा यथा,—हारीते १ स्थाने ११ अध्याये।
"कोकिलः श्लेष्मलो ज्ञेयः पित्तसंशमनस्तथा"।
मूषिककल्पान्तर्गतशुक्र-विष-जातीयविशेषः।
तद्दंशनजनितलक्षणानि यथा,—
"श्वयथुः कोकिलेनोग्रा ज्वरो दाहश्च दारुणः"॥
इति सुश्रुतेन कल्पस्थाने षष्ठाध्याय उक्तम् ॥)
अङ्गारः। इति त्रिकाण्डशेषः। (छन्दोविशेषः। इति वृत्तरत्नाकरः ॥)

कोकिलनयनः, पुं, (कोकिलस्य नयनमिव रक्तवर्णं पुष्पमस्य।) कोकिलाक्षवृक्षः। इत्यमरटीकायां रमानाथः ॥ (कोकिलाक्षशब्देऽस्य विवृतिर्ज्ञेया ॥)

कोकिलाक्षः, पुं, (कोकिलस्याक्षीव रक्तं पुष्पमस्य। "अक्ष्णोऽदर्शनात्"। ५। ४। ७६। इति अच्।) वृक्षविशेषः। कुलियाखाड़ा इति भाषा। तालमखाना इति हिन्दी भाषा ॥ तत्पर्य्यायः। इक्षुगन्धा २ काण्डेक्षुः ३ इक्षुरः ४ क्षुरः ५। इत्यमरः। २। ४। १०४ ॥ शृगाली ६ शृङ्खली ७ क्षुरकः ८ शृगालघण्टी ९ वज्रास्थिः १० शृङ्खला ११ वज्रकण्टकः १२ इक्षुः १३ इक्षुरकः १४ वज्रः १५ शृङ्खलीका १६ पिकेक्षणा १७ पिच्छिला १८। इति राजनिर्घण्टः ॥ श्वेतस्य तस्य पर्य्यायः। वीरतरुः २ त्रिक्षुरः ३ क्षुरकः ४ शुक्लपुष्पः ५। रक्तस्य तस्य पर्य्यायः ॥ छत्रकः २ अतिच्छत्रः ३। इति रत्नमाला ॥ सामान्यस्य तस्य गुणाः। आमवातवातरक्तरोगनाशित्वम्। इति राजवल्लभः ॥ मधुरत्वम्। शीतत्वम्। पित्तातिसारनाशित्वम्। शुक्रकफबलरुचिकारित्वम्। सन्तर्पणत्वञ्च। इति राजनिर्घण्टः ॥ (श्वेतकोकिलाक्षमूलं छागीदुग्धेन पिष्टं सत् भक्षितं क्षयरोगं नाशयेत्। यदुक्तं गारुड़े १९२ अध्याये।
"श्वेतकोकिलाक्षमूलं छागीक्षीरेण संयुतम्।
त्रिसप्ताहेन वै पीतं क्षयरोगं क्षयं नयेत्" ॥)

कोकिलाक्षकः, पुं, (कोकिलाक्ष+स्वार्थे कन्।) कोकिलाक्षवृक्षः। इत्यमरटीकायां स्वामी ॥ (यस्मिन्नस्य व्यवहारस्तद्यथा,—
"कोकिलाक्षकनिर्य्यूहः पीतस्तच्छाकभोजिना।
कृपाभ्यास इव क्रोधं वातरक्तं नियच्छति" ॥
इति वाभटे चिकित्सास्थाने २२ अध्याये ॥)

कोकिलावासः, पुं, (आवसत्यस्मिन् इति। आ+वस्+अधिकरणे घञ्। कोकिलानां आवासः।) आम्रवृक्षः। इति राजनिर्घण्टः ॥

कोकिलेक्षुः, पुं, (कोकिल इव कृष्णवर्ण इक्षुः।) कृष्णेक्षुः। इति राजनिर्घण्टः ॥

कोकिलेष्टा, स्त्री, (कोकिलस्य इष्टा प्रिया।) महाजम्बूः। इति राजनिर्घण्टः ॥

कोकिलोत्सवः, पुं, (कोकिलानां उत्सवोऽत्र।) आम्रवृक्षः। इति राजनिर्घण्टः ॥

कोङ्कणं, क्ली, (कोङ्कणे भवं कोङ्कणदेशस्थैः कर्म्मकारैर्निर्म्मितमिति भावः। "तत्र भवः"। ४। ३। ५३। इत्यण् तस्य लुक्।) शस्त्रभेदः। इति हेमचन्द्रः ॥

कोङ्कणः, पुं, देशविशेषः। इति त्रिकाण्डः। कोकण इति भाषा ॥ (यथा, आगमे।
"अथाभ्यङ्गं समारभ्य कटिदेशस्य मध्यगे।
समुद्रप्रान्तदेशो हि कोङ्कणः परिकीर्त्तितः"॥
देशोऽयं कूर्म्मविभागे दक्षिणस्यां दिशि वर्त्तते। यथा, महाभारते। ६। ९। ५९।
"अथापरे जनपदा दक्षिणा भरतर्षभ"!।
"कौकुट्टकास्तथा चोलाः कोङ्कणा मलवा नराः" ॥
क्वचिदेकवचनत्वमपि दृश्यते।
यथा, स्मृतिसंग्रहे।
"मालवे गौड़देशे च सिन्धुदेशे च कोङ्कणे।
व्रतं चूड़ां विवाहञ्च वर्ज्जयेत् मकरे गुरौ" ॥)

कोङ्कणासुतः, पुं, (कोङ्कणे तदाख्यप्रदेशे भवा। अण् तस्य लुक् च। कोङ्कणा रेणुका तस्याः सुतः पुत्त्रः।) परशुरामः। इति शब्दमाला ॥

कोचः, पुं, (कुच्+ज्वलादित्वात् कर्त्तरि णः।) जातिविशेषः। स तु मांसच्छेदिगर्भे तीवरस्यौरसजातः। इति ब्रह्मवैवर्त्तपुराणम् ॥

कोजागरः, पुं, (को जागर्त्ति अस्यां पौर्णमासीनिशायां इति लक्ष्म्या देव्या उक्तिर्यत्र समये। पृषोदरात् साधुः।) आश्विनी पूर्णिमा। तत्पर्य्यायः। शारदी २ द्यूतपूर्णिमा ३ शरत्पर्व्व ४ कौमुदी ५। इति त्रिकाण्डशेषः ॥ अथ कोजागरकृत्यानि। तत्र ब्रह्मपुराणम्।
"आश्वयुज्यां पौर्णमास्यां निकुम्भो वालुकार्णवात्।
आयाति सेनया सार्द्धं कर्त्ता युद्धं सुदारुणम् ॥
तस्मात् तत्र नरैर्मार्गाः स्वगेहस्य समीपतः।
शोधितव्याः प्रयत्नेन भूषितव्याश्च मण्डनैः ॥
पुष्पार्घ्यफलमूलौघसर्षपप्रकरैस्तथा।
वेश्मानि भूषितव्यानि नानावर्णैर्विशेषतः ॥
सुस्नातैरनुलिप्तैश्च नरैर्भाव्यं सबान्धवैः।
दिवा तत्र न भोक्तव्यं मनुष्यैश्च विवेकिभिः ॥
स्त्रीबालवृद्धमूर्खैश्च भोक्तव्यं पूजितैः सुरैः।
पूज्याश्च सफलैः पत्रैस्तथा द्वारोर्द्धभित्तयः ॥
द्वारोपान्ते सुदीप्तस्तु संपूज्यो हव्यवाहनः।
यवाऽक्षतघृतोपेतैस्तण्डुलैश्च सुतर्पितः ॥